दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् आषाढ़शुक्लप्रतिपदा
आषाढः 31 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-263 | 1 | जुलाई 15, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com



2 भोपाले देशस्य प्रथमा 'स्पेस एक्सप्लोरेशन गैलरी' उद्घाटिता

3 शास्त्री-शिक्षक-नियुक्तौ बी.एड. उत्तीर्ण-अभ्यर्थिनां नियुक्तौ प्रतिबन्धेन सम्बद्ध-प्रकरणे २० जुलाई दिनाङ्के भविष्यति श्रवणम्

5 हजारीबागनगरे सन्तकोलम्बा-कृष्णवल्लभ- महिलामहाविद्यालययोः संस्कृतनामांकनं पुनः प्रारब्धम्


## धोलेरा-अन्तर्राष्ट्रिय-विमानपतनं मासत्रयाभ्यन्तरे क्रियाशीलं भविष्यति



हिमसंस्कृतवार्ता। नागरविमानमन्त्री किंजरापु राममोहननायडूवर्यः असूचयत् यत् धोलेरा-अन्तर्राष्ट्रिय-विमानपतनं (हवाई अड्डा) मासत्रयाभ्यन्तरे क्रियाशीलम् (प्रचालित) भविष्यति। परियोजनायाः प्रगतेः समीक्षायाः अनन्तरं माध्यमैः (मीडिया) सह सम्भाषणे सः अवदत् यत् विमानपतनस्य प्रायः 80 प्रतिशतं कार्यं पूर्णं जातम्। सर्वकारस्य लक्ष्यम् आगामिनि मासत्रये यात्री-टर्मिनल-भवनस्य अवशिष्टं निर्माणं तथा च आवश्यक-अनुज्ञप्ति-प्रक्रियां (लाइसेंस) संपाद्य उड्डयनसेवानां प्रारम्भः अस्ति। श्रीनायडूः अवदत् यत् धोलेरा देशस्य एका विचित्रा (अनूठी) परियोजना अस्ति, यत्र अन्तर्राष्ट्रिय विमानपतनेन सह निर्माणकेन्द्रं (विनिर्माण केंद्र), भविष्यस्य हरितनगरं, सेमीकंडक्टर-केन्द्रं (हब) तथा च बहु-माध्यम-परिवहन-सौविध्यं विकस्यते। सः असूचयत् यत् धावनमार्गस्य (रनवे), टैक्सीवे-मार्गस्य तथा च विमानयातायात-नियन्त्रणेन (ATC) सम्बद्धानां सहायकभवनानां निर्माणं पूर्णतया समाप्तं जातम्, यदा तु यात्री-टर्मिनल-भवनस्य प्रायः 75 प्रतिशतं कार्यं पूर्णम् अस्ति। श्रीनायडूः एतदपि अकथयत् यत् विमानपतने सी-295 (C-295) रक्षाविमानस्य रखरखावाय, संस्काराय (मरम्मत) तथा च जीर्णोद्धाराय (ओवरहॉल) विशेषाः 'हैंगर' (विमानशालाः) निर्मास्यन्ते। सी-295 विमानं एयरबस-वडोदरा-साझेदारी-अन्तर्गतं निर्मितं भारतस्य प्रथमं स्वदेशीयं सैन्यपरिवहनविमानम् अस्ति।

## २२ तमायाः राष्ट्रमण्डल-टेबलटेनिस-प्रतियोगितायाः शुभंकरस्य अनावरणम्



हिमसंस्कृतवार्ता नरेन्द्रराणा। मुख्यमन्त्री रेखागुप्ता नवदेहल्यां २२ तमायाः राष्ट्रमण्डल-टेबलटेनिसप्रतियोगितायाः शुभंकरस्य अनावरणं कृतवती। आयोजनं सम्बोधयन् गुप्तामहोदया अवदत् यत् दिल्लीसर्वकारः क्रीडासंरचनासुदृढां कर्तुं, प्रशिक्षणसुविधासु सुधारं कर्तुं, क्रीडकानां कृते अधिकानि अवसरानि प्रदातुं च निरन्तरं प्रयतते। सा अवदत् यत् राष्ट्रमण्डलस्य अनेकदेशानां क्रीडकाः अस्मिन् चॅम्पियनशिप्-क्रीडायां भागं गृह्णन्ति । सा आश्वासनं दत्तवती यत् दिल्लीसर्वकारः आयोजनाय सर्वाणि आवश्यकानि रसद-प्रशासनिक-सहायतां दास्यति। दिल्लीक्रीडामन्त्री आशीषसूदः अवदत् यत् दिल्लीसर्वकारः क्रीडासुविधासु सुधारं कर्तुं प्रतिबद्धः अस्ति। सः अपि अवदत् यत् राष्ट्रिय-अन्तारष्ट्रीय-राज्य-स्तरीय-स्पर्धासु भागं गृह्णन्तः छात्राणां कृते प्रत्येकस्मिन् क्रीडाङ्गणे सर्वकारः मूलभूत-सुविधाः प्रदाति । अवधेयं वर्त्तते यत् अस्याः प्रतियोगितायाः आयोजनं त्यागराज-क्रीडाङ्गणे अस्य मासस्य २७ दिनाङ्कात् आगामिमासस्य द्वितीयदिनांक पर्यन्तं भविष्यति।

## मन्सुखमाण्डवीयवर्येण हैदराबादे अत्याधुनिक-ओपीडी-भवनस्य उद्घाटनं कृतम्



हिमसंस्कृतवार्ता। श्रम-रोजगारमन्त्री मन्सुखमाण्डवीयवर्यः हैदराबादनगराभ्यन्तरे सनतनगरे स्थिते ईएसआईसी-चिकित्सालये 211 कोटिरूप्यकाणां व्ययेन निर्मितस्य अत्याधुनिकस्य बाह्यरोगिविभागस्य (ओपीडी-ब्लॉक) उद्घाटनम् अकरोत्। अस्मिन् अवसरे तेन सह राज्यमन्त्री जी. विवेकवेङ्कटस्वामी अपि उपस्थितः आसीत्। श्रीमाण्डवीयः देशस्य विविधभागेषु 650 कोटिरूप्यकाभ्यः अधिकमूल्यस्य अन्यासां षण्णां ईएसआई-परियोजनानाम् अपि आभासी-माध्यमेन (वर्चुअल) उद्घाटनं कृतवान्। एताभिः परियोजनाभिः देशव्यापिनः त्रिपञ्चाशत् (53) लक्षमिताः लाभान्विताः जनाः आईसीयू (ICU) तथा एनआईसीयू (NICU) सहितं आधुनिकं निःशुल्कं च चिकित्सासौविध्यं प्राप्स्यन्ति। उद्घाटनान्तरं द्वाभ्यां मन्त्रिभ्यां चिकित्सालयस्य निर्माणे योगदानं दत्तवतां श्रमजीविनां सम्माननम् अपि कृतम्।अस्मिन् अवसरे श्रीमाण्डवीयः अवदत् यत् श्रमशक्तिः युवाशक्तिः च देशस्य प्रगतेः द्वौ प्रमुखाधौ स्तः। सः अकथयत् यत् तन्त्रांशस्य (तकनीक) विकासे सत्यपि आधारभूतसंरचनायाः निर्माणे श्रमजीविनां भूमिकायाः कश्चिप विकल्पः नास्ति। अतः सर्वकारः सामाजिकसुरक्षायै सर्वोच्चप्राथमिकतां ददाति।सः अवदत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे गतेषु दशसु वर्षेषु ईएसआईसी-संस्थायाः लाभान्वितानां सङ्ख्या सार्धसप्तकोटितः (7.5 करोड़) वर्धित्वा पञ्चदशकोटिः (15 करोड़) अभवत्। अनेन सह देशे सामाजिकसुरक्षायाः क्षेत्रं 19 प्रतिशतात् वर्धित्वा 64 प्रतिशतं जातम्।श्रीमाण्डवीयः असूचयत् यत् नवसु चतसृषु श्रमसंहितासु (लेबर कोड) श्रमजीविभ्यः नियुक्तिपत्रं, महिलाभ्यः समानवेतनं तथा च एकवर्षस्य सेवायाः अनन्तरं उपदानस्य (ग्रेच्युटी) अधिकारः सुनिश्चितः कृतः। सः 'विकसितभारत २०२७' इति लक्ष्यं प्राप्तुम् उद्योगेभ्यः श्रमसङ्गठनेभ्यः च सहसा कार्यं कर्तुम् आह्वानं कृतवान्, विश्वासं च प्रकटितवान् यत् एषः नवीनः चिकित्सालयः लक्षशः जनेभ्यः उत्तमं स्वास्थ्यसेवां प्रदास्यति।

## सुभाषितम्

**सत्येन रक्ष्यते धर्मो,**
**विद्या योगेन रक्ष्यते।**
**मृजया रक्ष्यते रूपं,**
**कुलं वृत्तेन रक्ष्यते।।**

अर्थात्- सत्य से धर्म की रक्षा होती है। निरंतर अभ्यास (योग) से विद्या की रक्षा होती है, स्वच्छता से रूप (सौंदर्य) की रक्षा होती है और सदाचार (चरित्र) से कुल की प्रतिष्ठा की रक्षा होती है।







सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्


## त्रयोदश-शौर्यविजययात्रायाः ध्वजं प्रदर्शितवान् रक्षामन्त्री




हिमसंस्कृतवार्ता नरेन्द्रराणा। रक्षामन्त्री राजनाथसिंहः नवदेहल्यां राष्ट्रिययुद्धस्मारकात् १३ दिवसीयस्य शौर्यविजययात्रायाः ध्वजं प्रदर्शितवान्। अस्मिन् अवसरे स्वस्य सम्बोधने सिंहमहोदयेन विश्वासः प्रकटितः यत् एतत् अभियानं जनानां मध्ये विशेषतः युवानां मध्ये देशभक्तिभावना पुनः प्रज्वलिता भविष्यति। सः अवदत् यत् एतत् भविष्यत्पुस्तकेभ्यः सन्देशं प्रेषयिष्यति यत् राष्ट्रस्य स्वातन्त्र्यस्य, सम्मानस्य च रक्षणं न केवलं सीमासु, अपितु जनानां स्मृतौ मूल्येषु च निहितम् अस्ति।

# भोपाले देशस्य प्रथमा 'स्पेस एक्सप्लोरेशन गैलरी' उद्घाटिता



**हिमसंस्कृतवार्ता।** संस्कृति-पर्यटनमन्त्री गजेन्द्रसिंहशेखावतवर्यः मध्यप्रदेशस्य राजधान्यां भोपाले देशस्य प्रथमाम् अन्तरिक्ष-अन्वेषण-वीथिकाम् (स्पेस एक्सप्लोरेशन गैलरी) उद्घाटितवान्। अस्मिन् अवसरे मुख्यमन्त्री डॉ. मोहनयादवः अपि उपस्थितः आसीत्। एषा वीथिका भोपालस्य क्षेत्रीयविज्ञानकेन्द्रे स्थापिता अस्ति।अस्मिन् अवसरे श्रीशेखावतः अवदत् यत् मध्यप्रदेशेन स्वकीया अन्तरिक्षनीतिः निर्मिता। सः अस्य श्रेयम् मुख्यमन्त्रिणः डॉ. मोहनयादवस्य प्रयासभ्यः (पहल) दत्तवान्। सः अकथयत् यत् अस्याः वीथिकायाः माध्यमेन छात्राः अन्तरिक्षविज्ञानविषये विस्तरेण ज्ञानं प्राप्स्यन्ति।एषा वीथिका राष्ट्रियविज्ञानसङ्ग्रहालयपरिषदा सज्जीकृता अस्ति। अस्याः निर्माणे मुम्बईनगरस्य नेहरूविज्ञानकेन्द्रेन प्राविधिकं (तकनीकी) सहयोगं दत्तम्। अस्य उद्देश्यं जनेषु विज्ञानं प्रति रुचिं वैज्ञानिकचिन्तनं च वर्धयितुम् अस्ति।आधुनिक-डिजिटल-तन्त्रज्ञानेन सुसज्जितायाम् अस्यां वीथिकायां ब्रह्माण्डस्य भारतस्य अन्तरिक्ष-अभियानानां च सूचना दत्ता अस्ति। अस्मिन् भारतस्य प्राचीनायाः ज्ञानपरम्परायाः सहैव आर्यभट्ट-चन्द्रयान-गगनयानसदृश्यः उपलब्धयः अपि प्रदर्शिताः सन्ति।वीथिकायाम् आगन्तुकजनाः 'स्पेस वॉक' (अन्तरिक्षभ्रमणम्) तथा 'फ्लाइट सिमुलेटर' इत्यस्य अनुभवम् अपि प्राप्तुं शक्ष्यन्ति। एतदतिरिच्य चन्द्रस्य मङ्गलग्रहस्य च त्रिविमीय-सतहं (थ्री-डी धरातलम्) अपि द्रष्टुं शक्यते।

# राष्ट्रियमानवाधिकारायोगेन झारखण्डस्य सर्वकाराय निर्देशः

हिमसंस्कृतवार्ता। राष्ट्रीयमानवाधिकारायोगेन झारखण्डस्य लोहरदगामण्डलस्य एकस्मिन् आवासीयविद्यालये चतस्रः छात्राः प्रति सर्पदंशनस्य घटनायाः स्वतः संज्ञानं गृहीतम्। आयोगेन झारखण्डस्य मुख्यसचिवात् सप्ताहद्वयाभ्यन्तरे सविस्तरः प्रतिवेदनः याचितः।आयोगेन राज्यसर्वकारः निर्देशितः यत् सः आहतछात्राणां चिकित्सायाः विवरणस्य सूचनां दद्यात्। अस्मिन् राँचीनगरस्य रिम्स-चिकित्सालये उपचाराधीनायाः छात्रायाः स्थितेः विवरणमपि सम्मिलितम् अस्ति।एषा घटना जुलै-मासस्य सप्तमे दिनाङ्के रात्रौ अभवत्, यदा एकः सर्पः छात्रावासं प्रविश्य भूमितले शयानाः चतस्रः छात्राः अदशत्। एतासु एका छात्रा चिकित्साकाले मृता, अन्याः तिस्रः छात्राः तु सङ्कटमुक्ताः कथ्यन्ते।आयोगेन कथितं यत् यदि माध्यमेषु (मीडिया) आगतानि वृत्तान्तानि सत्यानि सन्ति, तर्हि एषा घटना छात्राणां मानवाधिकारोल्लङ्घनस्य गम्भीरः विषयः अस्ति।

# वेगनौकादुर्घटनायां मृतानां १५ भारतीयपर्यटकानाम् शवः स्वदेशं प्रत्यागताः

हिमसंस्कृतवार्ता नरेन्द्रराणा। वियतनामदेशस्य फु क्वोक इति द्वीपस्य समीपे वेगनौकादुर्घटनायां मृतानां १५ भारतीयपर्यटकानाम् शवः स्वदेशं प्रत्यागताः।वियतनामदेशे भारतीयदूतावासेन सोशल मीडिया पोस्ट् मध्ये उक्तं यत् वियतनामविमानसेवाद्वारा होची मिन् नगरात् मुम्बईनगरं प्राप्ताः। दूतावासेन उक्तं यत् आन्ध्रप्रदेशः, केरलः, तमिलनाडुः च सर्वकाराः शवस्य स्वस्वराज्येषु स्वगृहं प्रति प्रत्यागमनस्य समन्वयं करिष्यन्ति। वियतनाम-अधिकारिणः, सर्वकारस्य च कृतज्ञतां प्रकटयन् दूतावासेन उक्तं यत् तेषां प्रार्थनाः, प्रयत्नाः, उपस्थितिः च अस्मिन् शोककाले बलं ददाति इति वियतनामदेशस्य फु क्वाक् द्वीपस्य समीपे शुक्रवासरे ३२ भारतीयपर्यटकानाम्, चत्वारि स्थानीयचालकदलस्य सदस्याः च आदाय एकः स्पीडबोट् दुर्घट्टितः, यस्मिन् १५ पर्यटकाः मृताः। षोडश जीविताः जनाः भारतं प्रत्यागताः सन्ति। तेषु एकः पर्यटकः सम्प्रति वियतनामदेशे चिकित्सालये निक्षिप्तः अस्ति ।

# ८४० सन्दिग्धानां परीक्षणं, ५७३ स्थानेषु निरीक्षणम्, 'एंटी चिट्टा' अभियानस्य द्वितीये चरणे विशेषकार्यबलस्य (STF) कार्यविधिः



**हिमसंस्कृतवार्ताः — शिमला।**'एंटी चिट्टा' (मादकपदार्थ-विरोधी) अभियानस्य द्वितीये चरणे विशेषकार्यबलेन (STF - स्पेशल टास्क फोर्स) सम्पूर्णे प्रदेशे ८४० सन्दिग्धानां परीक्षणं (स्क्रीनिंग) कृतम् अस्ति। तत्रैव ५७३ एकान्तस्थानेषु सघनं शङ्कास्पद-अन्वेषण-अभियानमपि चालितम्। साकमेव परीक्षाविध्यर्थं ११४ सन्दिग्धानां मूत्रस्य प्रतिरूपाणि (Samples) अपि विशेषकार्यबलेन सङ्गृहीतानि। एतदतिरिच्य विशेषकार्यबलेन विशेष-अभियानस्य अन्तर्गतं २.५७ ग्राम-परिमितं चिट्टा (मादकद्रव्यं) सम्प्राप्य द्वौ जनौ निरुद्धौ कृतौ। राज्य-आरक्षिबलस्य (पुलिस) प्रवक्त्रा मङ्गलवासरे ज्ञापितं यत् सर्वेषु मण्डलेषु विशेषकार्यबलेन मण्डल-आरक्षिबलेन च राज्यस्तरे मादकपदार्थानां दुरुपयोगस्य तस्करी-निवारणस्य च कृते स्थाने-स्थाने सहसा निरीक्षणं क्रियते।

**५७३ निर्जन-एकान्तस्थलानाम् अन्वेषणम्**


अस्य विशेष-अभियानस्य अवसरे सम्पूर्णे प्रदेशे ५७३ निर्जनानाम्, एकान्तानां तथा च अर्ध-सार्वजनिकस्थलाणां निरीक्षणं कृत्वा सघनम् अन्वेषण-अभियानं सञ्चालितम्। अभियानकाले ८४० सन्दिग्धानां जनानां परीक्षणं विहितं, येषु ११४ जनानां मूत्रस्य प्रतिदर्शाः (नमूने) सङ्गृहीताः। एतद्विना १७७४ वाहनानां अन्वेषणं कृतम्, १६९ कोटपा (COTPA) चालानानि विहितानि तथा च एकः अभियोगः पञ्जीकृतः जातः। अभियानस्य अन्तरे २.५७ ग्राम-परिमितं चिट्टा इति मादकद्रव्यं हस्तगतं विहितं द्वौ पुरुषौ च आरक्षिबलेन निरुद्धौ। ८८५ चयनितेषु संवेदनशीलेषु स्थानेषु 'नो ड्रग एब्यूज' (मादकपदार्थ-निषेधः) इति सूचकाः पट्टिकाः अपि स्थापिताः सन्ति।

# पश्चिमबङ्गाले कृषिणः विकासाय कार्ययोजना (रोडमैप) सज्जीक्रियते




हिमसंस्कृतवार्ता। कृषि-कृषककल्याण-ग्रामीणविकासमन्त्री शिवराजसिंहचौहानः अवदत् यत् पश्चिमबङ्गाले ऋतोः मृत्तिकायाः च अनुसारं कृषिविकासस्य कार्ययोजना (रोडमैप) सज्जीक्रियते। राज्यसचिवालये 'नवान्न' नामके आयोजितायां गोष्ठ्यां (बैठक) सः अकथयत् यत् एतां कार्ययोजनां निर्मातुं कृषिविश्वविद्यालयाः, शोधसंस्थानानि पश्चिमबङ्गालसर्वकारः च मिलित्वा कार्यं कुर्वन्ति।श्रीचौहानः असूचयत् यत् पश्चिमबङ्गालस्य चिन्सुरा-मालदा इत्यादिषु चतुर्षु स्थानेषु आलुकस्य पटशणस्य (जूट) च बीजानां प्रशिक्षण-अनुसन्धानकेन्द्राणि स्थापयिष्यन्ति। सः कृषकाणां कृते डिजिटल-परिचयपत्राणां निर्माणाय तथा च प्रधानमन्त्री-फसलबीमायोजनासहितं विभिन्नकेन्द्रीययोजनानां प्रभावशालि-क्रियान्वयनाय राज्यसर्वकारस्य प्रशंसां कृतवान्। अस्यां गोष्ठ्यां पश्चिमबङ्गालस्य मुख्यमन्त्री शुभेन्दुअधिकारी, राज्यस्य कृषिमन्त्री दूधकुमारमण्डलः, पञ्चायतमन्त्री दिलीपघोषः तथा अन्ये वरिष्ठाधिकारिणः गणमान्याः जनाः च उपस्थिताः आसन्।

# देशस्य प्रथमः प्रायोगिकः सेवा-उत्पादन-सूचकाङ्कः (ISP) प्रचालितः



हिमसंस्कृतवार्ता। सर्वकारेण देशस्य प्रथमस्य सेवा-उत्पादन-सूचकाङ्कस्य (ISP) प्रथमः प्रायोगिकः सूचकाङ्कः प्रचालितः। अनेन प्रथमतया औपचारिक-सेवाक्षेत्रस्य गतिविधिनां मासिकं मूल्याङ्कनं उपलब्धं भविष्यति। वर्षं 2024-25 आधारवर्षं मत्वा सज्जीकृतः एषः प्रथमः सूचकाङ्कः 2026 तमस्य वर्षस्य एप्रिल-मासस्य अस्ति। अस्मिन् सेवाक्षेत्रस्य 19 उपक्षेत्राणि सम्मिलितानि सन्ति, यानि भारतस्य प्रायः 60 प्रतिशतं सेवाक्षेत्रस्य प्रतिनिधित्वं कुर्वन्ति।साङ्ख्यिकी-कार्यक्रमक्रियान्वयन-मन्त्रालयेन एतत् देशस्य सेवाक्षेत्रस्य उत्तममूल्याङ्कनाय साङ्ख्यिकीव्यवस्थायाः सुदृढीकरणाय च एकं महत्त्वपूर्णं पदं कथितम्। मन्त्रालयेन उक्तं यत् परीक्षणशृङ्खलायाः समीक्षायाः क्षेत्रविस्तारस्य च अनन्तरं सेवाउत्पादनस्य समग्रः सूचकाङ्कः प्रचालयिष्यते।एप्रिल-मासस्य अङ्कप्रमाणानुसारं (आँकड़ों के अनुसार) सेवाक्षेत्रे व्यापिका वृद्धिः अङ्किता। 19 उपक्षेत्रेषु 14 उपक्षेत्रेषु गतवर्षस्य एप्रिल-मासस्य तुलनायां द्व्यङ्कीया (two-digit) वृद्धिः दृष्टा, यदा तु अन्येषु प्रायः सर्वेषु क्षेत्रेषु अपि सकारात्मिका वृद्धिः अभवत्।मन्त्रालयेन सूचितं यत् सेवा-उत्पादन-सूचकाङ्कः प्रतिमासं 29 दिनाङ्के जारीकरिष्यते। अनेन नीतिनिर्मातॄणां, उद्योगजगतः, शोधकर्तॄणां च सेवाक्षेत्रस्य अल्पकालिकानां विधीनां समये मूल्याङ्कनं कर्तुं साहाय्यं मिलिष्यति।

# मुख्यमन्त्रिणा ममलीग-क्षेत्रे कृतं ५०० किलोवाट (KW) सौरपरियोजनायाः उद्घाटनम्, पञ्चायतस्य भविष्यति वार्षिकी १४ लक्षपरमिता आयः



हिमसंस्कृतवार्ताः — शिमला। मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खू महोदयेन शिमलातः आभासीय-माध्यमेन (वर्चुअल माध्यम से) सोलनमण्डलस्य ग्रामपञ्चायते ममलीग इत्यस्यां 'ग्रीन पञ्चायत' (हरितपञ्चायत) योजनायाः अन्तर्गतं ५०० किलोवाट-क्षमतायुक्तायाः भूतल-स्थापित (ग्राउंड माउंटेड) सौर-ऊर्जा-परियोजनायाः उद्घाटनं विहितम्। कोटिद्वयरूप्यकाणां (२ करोड़ रुपए) व्ययेन निर्मितायाः अस्याः परियोजनायाः कार्यं २३ दिसम्बर २०२४ दिनाङ्के आरब्धम् आसीत् तथा च २४ फरवरी २०२६ दिनाङ्के इयं विद्युत्-ग्रिड् (विद्युत्प्रणाडिका) इत्यनेन सह संयोजिता। मुख्यमन्त्रिणा प्रतिपादितं यत् अस्याः परियोजनायाः सम्प्रति प्रतिदिनं प्रायः ३००० यूनिट् स्वच्छविद्युतः उत्पादनं भवति तथा च वार्षिकी प्रायः अष्टलक्षयूनिट् परिमितं उत्पादनं स्थास्यति। तेन प्रोक्तं यत् विद्युत्क्रयसहमत्यानुसारं 'हिमाचलप्रदेश राज्य विद्युत बोर्ड लिमिटेड' ३.५० रूप्यकाणि प्रति-यूनिट् दरेण क्रयणं विधास्यति, येन राज्यं स्वच्छ-ऊर्जया साकं दीर्घकालिकं स्थिरं च राजस्वं प्राप्स्यति।

## जनहितकारी राजस्व-वितरण-प्रतिरूपम्

मुख्यमंत्री सुक्खू महोदयेन कथितं यत् अस्याः परियोजनायाः सर्वतः बृहती विशेषता अस्याः जनहितकारी राजस्व-वितरण-प्रतिरूपम् (मॉडल) अस्ति। प्राप्तस्य आयस्य २५ प्रतिशतं भागः ग्रामपञ्चायतस्य विकासकार्येषु, २५ प्रतिशतं भागः अनाथानां विधवानामपि कल्याणाग्रहाय, २० प्रतिशतं भागः राज्यसर्वकाराय, २० प्रतिशतं भागः 'हिमऊर्जा' इत्यस्मै तथा च १० प्रतिशतं भागः सञ्चालन-स्थापनार्थं (operations and maintenance) व्ययीकरिष्यते। अनेन स्थानीयसमुदायाय प्रत्यक्षः आर्थिकः सामाजिकश्च लाभः संप्राप्स्यते। अस्याः परियोजनायाः ग्रामपञ्चायतस्य प्रतिवर्षं १४ लक्षरूप्यकाणाम् आयः जनिष्यते। मुख्यमन्त्रिणा प्रोक्तं यत् २५ वर्षपरिमित-परियोजनायुक्ता इयं सौर-ऊर्जा-परियोजना स्वच्छ-ऊर्जा-उत्पादने, पर्यावरणसंरक्षणे, ग्रामीणविकासे तथा च सामाजिकसमृद्धौ एकं श्रेष्ठम् उदाहरणं वर्तते। तेन उक्तं यत् एषा प्रचेष्टा प्रदेशस्य शाश्वतविकासलक्ष्याणि सशक्तं विधातुं साकमेव ग्रामपञ्चायतान् आत्मनिर्भरं कर्तुं प्रमुखा दिशि एकं दृढं पदं सिद्धा भविष्यति।

## ग्रामीण-अर्थव्यवस्थायाः सुदृढीकरणाय प्रचेष्टा

मुख्यमंत्री. सुक्खू महोदयेन प्रतिपादितं यत् राज्यसर्वकारः ग्रामीण-अर्थव्यवस्थां सुदृढां कर्तुं प्रयतते तथा च पञ्चायतेषु सौर-ऊर्जा-परियोजनानां निर्माणम् अस्याः दिशि उत्थापितं दृढपदं वर्तते। तेन प्रोक्तं यत् राज्यसर्वकारः प्राकृतिककृष्या उत्पादितेभ्यः उत्पादेभ्यः न्यूनतम-समर्थन-मूल्यं (MSP) प्रदाति तथा च दुग्धाय अपि देशे सर्वाधिकं समर्थनमूल्यं दीयते। तेन कथितं यत् राज्यसर्वकारः इच्छति यत् ग्रामेषु अपि नगराणाम् इव सौकर्याणि उपलभ्यन्ते।

## स्वास्थ्यसंस्थानेषु आधुनिकाः स्वास्थ्यसुविधाः

ममलीग-क्षेत्रे उपस्थितः स्वास्थ्य एवं परिवारकल्याणमन्त्री डॉ. (कर्नल) धनीरामशाण्डिलमहोदयः अस्य प्रकल्पस्य कृते मुख्यमन्त्रिणः कृतज्ञतां ज्ञापयन् अवदत् यत् तस्य नेतृत्वे राज्यसर्वकारः शिक्षा-स्वास्थ्यक्षेत्रयोः अभूतपूर्वं परिष्कारम् आनयति। मुख्यमन्त्रिणः विशेषप्रचेष्टाभिः अद्य सर्वकारीय-स्वास्थ्यसंस्थानेषु चिकित्सकानां (डॉक्टरों) ८० प्रतिशततः अपि अधिकाः पदाः पूरिताः सन्ति। एतदतिरिच्य पैरा-मेडिकल-कर्मचारिणां तन्त्राणां (टेक्नीशियन) च पदाः अपि पूरिताः। तेन कथितं यत् काङ्ग्रेससर्वकारस्य कार्यकाले हिमाचलप्रदेशस्य सर्वकारीयसंस्थानेषु एम.आर.आई. (MRI), थ्री-टेस्ला (3 Tesla) तथा च रोबोटिक-शल्यक्रिया (रोबोटिक सर्जरी) सदृशाः आधुनिकाः स्वास्थ्यसुविधाः प्राप्तुं प्रारब्धाः, याः पूर्वं केवलं बृहन्नगरेषु बृहच्चिकित्सालयेषु च आसन्। तेन प्रतिपादितं यत् हिमाचलप्रदेशे मादकपदार्थानां (नशे के खिलाफ) विरुद्धमपि राज्यसर्वकारेण एकं महत् अभियानं सञ्चालितम् अस्ति। अस्मिन् अभियाने सर्वैः वर्गैः स्वसहयोगः दातव्यः येन हिमाचलप्रदेशः 'चिट्टा' इति मादकद्रव्यात् मुक्तः भवितुं शक्नोति।

# शास्त्री-शिक्षक-नियुक्तौ बी.एड. उत्तीर्ण-अभ्यर्थिनां नियुक्तौ प्रतिबन्धेन सम्बद्ध-प्रकरणे २० जुलाई दिनाङ्के भविष्यति श्रवणम्

हिमसंस्कृतवार्ताः — शिमला। हिमाचलप्रदेशस्य उच्चन्यायालयः (हाईकोर्ट) वर्ष २०२३ तमस्य वर्षस्य शास्त्रीपदानां नियुक्तिप्रक्रियायाः अन्तर्गतं बी.एड्. उत्तीर्ण-अभ्यर्थिभ्यः नियुक्तयः प्रदातुं प्रक्रियायाम् ३० अप्रैल दिनाङ्के अन्तरिमं प्रतिबन्धं स्थापितवान् आसीत्। न्यायालयेन अस्मिन् प्रकरणे राज्यसर्वकारं सम्बद्धविभागं च आगामिश्रवणं यावत् नियुक्तिप्रक्रियायां यथास्थितिं (status quo) स्थापयितुम् आदेशाः प्रसारिताः आसन्। अधुना अस्मिन् प्रकरणे आगामिश्रिणस्य तिथिः २० जुलाई निश्चिता कृता अस्ति। न्यायाधीशस्य अजयमोहनगोयलस्य समक्षम् अस्य विषयस्य श्रवणं संजातम्।



# बद्दी-क्षेत्रे अवैध-औषधीनां महत् सञ्चयः हस्तगतः

हिमसंस्कृतवार्ताः — सोलनम्।मानपुरा पुलिसस्थानकस्य (पुलिस थाना) औषधिविभागस्य (ड्रग विभाग) च संयुक्तदलेन ग्राम-गुरुमाजरा (बोरीवाला) तहसील-बद्दी स्थिते एकस्मिन् आवासीये गृहे संयुक्तां कार्यविधिं विधाय २९,९१० गुलिकाः (गोलियां) २०६ कूप्यः (शीशियां) च हस्तगताः कृताः। कार्यविधिकाले गृहे उपस्थितः सञ्जयखानः (निवासी-ग्राम एवं डाकघर गुरुमाजरा, तहसील बद्दी, मण्डलं सोलनम्) सम्प्राप्तानाम् औषधीनां सन्दर्भे किमपि वैधानिकं अनुज्ञापत्रं (लाइसेंस), विपत्रं (बिल) अथवा अन्यान् आवश्यकान् प्रलेखान् (दस्तावेज) प्रस्तुतं कर्तुं न शक्नोत्। औषधिविभागेन सर्वाः सम्प्राप्ताः औषधयः नियमानुसारं स्वाधिकारे गृहीत्वा 'ड्रग्स एंड कॉस्मेटिक्स एक्ट' इत्यस्य अन्तर्गतम् आगामी वैधानिकी कार्यविधिः आरब्धा।

## अवैध-मादक-व्यवसायस्य विरुद्धं दृढम् अभियानं प्रचलिष्यति

बद्दी-आरक्षिबलेन प्रतिपादितं यत् अवैध-मादक-व्यवसायस्य विरुद्धं दृढम् अभियानं भविष्ये अपि निरन्तरं प्रचलिष्यति। मादकपदार्थानां तस्करतायां संलिप्तः कोऽपि जनः न मुच्यते तथा च एतादृशानां तत्त्वानां विरुद्धं नियमानुसारेण कठोरा कार्यविधिः विधास्यते। मण्डल-आरक्षिबलस्य अतिरिक्त-आरक्षिकाधीक्षकः (ASP) अशोकवर्मा महोदयेन अस्य प्रकरणस्य पुष्टिः कृता अस्ति।

# किशाऊ-परियोजनायाः उपरि शीघ्रमेव भविष्यति सहमति-ज्ञापने (MoU) हस्ताक्षरम्, मुख्यमन्त्री अवदत् - प्रदेशाय प्रतिवर्षं भविष्यति ६०० कोटिरूप्यकाणाम् आयः



हिमसंस्कृतवार्ताः — शिमला। 'किशाऊ-बहुउद्देश्यीय-जलविद्युत्-परियोजनायाः' कृते प्रधानमन्त्रिणः नरेन्द्रमोदिनः उपस्थितौ सहभागि-राज्यानां भारतसर्वकारस्य च मध्ये शीघ्रमेव 'सहमति ज्ञापनम्' (MoU) हस्ताक्षरितं भवितुं सम्भावना वर्तते। ४२२ मेगावाट् क्षमतायुक्तायाः अस्याः परियोजनायाः कृते औपचारिक-एमओयू-हस्ताक्षरणात् पूर्वं, भारतसर्वकारेण एमओयू-प्रारूपं सहमति-राज्येभ्यः प्रेषयित्वा अस्य उपरि परामर्शाः टिप्पण्यश्च आमन्त्रिताः सन्ति।मुख्यमंत्री सुखविंदर सिंह सुक्खू महोदयेन शिमलायां किशाऊ-बहुउद्देश्यीय-परियोजनायाः एमओयू-प्रारूपस्य समीक्षायै उच्चस्तरीय-उपवेशनस्य अध्यक्षतां कृत्वा सम्बद्ध-अधिकारिभ्यः आवश्यकाः दिशानिर्देशाः दत्ताः। तेन प्रोक्तं यत् प्रदेशस्य जनानाम् अधिकाराणां हितानां च रक्षां सुनिश्चितां कृत्वा राज्यसर्वकारः अस्याः परियोजनायाः क्रियान्वयनाय पूर्णतया कटिबद्धः अस्ति। तेन कथितं यत् सद्यः आयोजिते उपवेशने ४२२ मेगावाट् परिमितायाः किशाऊ-बहुउद्देश्यीय-परियोजनायाः क्रियान्वयने सहमतिः संजाता, यस्य अन्तर्गतं हिमाचलप्रदेशाय परियोजनायां किमपि वित्तीय-निवेशं विना प्रतिवर्षं प्रायः ६०० कोटिरूप्यकाणां (600 करोड़ रुपए) राजस्वं प्राप्स्यते।

## पूर्वतनं सहमति-प्रारूपं राज्यसर्वकारेण अस्वीकृतम्

मुख्यमन्त्रिणा प्रतिपादितं यत् वर्तमान-राज्यसर्वकारेण पूर्वतनं सहमति-प्रारूपं (समझौते के प्रारूप को) अस्वीकृतं विहितं प्रदेशस्य हितान् सुरक्षितान् संस्थाप्य राज्यसर्वकारेण प्रस्तावित-नियमानां प्रावधानानां च कृते सर्वैः हितधारकैः स्वीकृतिः प्रदत्ता। अनेन राज्यस्य दीर्घकालिक-हितानां रक्षा सुनिश्चिता अभवत् परियोजनायाः क्रियान्वयनस्य मार्गश्च प्रशस्तः जातः। तेन उक्तं यत् संशोधितायाः व्यवस्थायाः अन्तर्गतं सर्वेभ्यः सहभागि-राज्येभ्यः विद्युत्-जलयोः तेषां वैधानिकः भागः प्राप्स्यते, तत्रैव हिमाचलप्रदेशाय अपि स्वकीयावश्यकतानुसारं जलाशयात् पर्याप्तं जलम् उपलब्धं कारयिष्यते।

शेषं पञ्चमे पृष्ठे...



# ।।महाकवि कालिदास दिनम्।।

उपमा कालिदासस्य इति सूक्ति प्रसिद्धा खलु। साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः। अर्थात् वस्तुद्वयस्य वैधर्म्यं विहाय साम्यमात्रं चेद् उच्यते एकस्मिन् वाक्ये तर्हि सा उपमा एषा उपमा काव्यशरीरे महती मञ्जुलतां समाद्धाति। कालिदासस्य तु उपमाप्रयोगे अपूर्वं वैशारद्यम्। तस्य उपमासु न केवलं रम्यता, यथार्थता, पूर्णता, विविधता च अपि तु सर्वत्र सर्वथा औचित्यमेव दृश्यते। औचित्यस्य समाश्रयेण तस्य उपमासु कचिद्पूर्वा चारुता सम्पद्यते।

न केवलं संस्कृतसाहित्ये अपि तु विश्वभाषा- साहित्ये कालिदासस्य ख्यातिः तस्य विलक्षणोपमारचनाया विशेषतो जाता। महाकवे कालिदासस्य उपमावैचित्र्यविषये समालोचकैः भूरिशः तत्प्रशंसा विहिता। यथा अत्रापि प्रस्तूयते अयं श्लोकः-

**"उपमा कालिदासस्य भारवेर्थगौरवम्।**
**दण्डिनः पदलालित्यं, माघे सन्ति त्रयोगुणाः।।"**

अस्य महाकवेः प्रसिद्धकृतेः रघुवंशमहाकाव्यस्य प्रारम्भोऽपि तत्प्रेष्ठालंकारेण उपमालंकारेणैव संजातोऽस्ति-

**"वागार्थाविव सम्पृक्तौ वागार्थप्रतिपत्तये।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ"**

महाकविरयं सिद्धहस्तः स्वभावसिद्धो वा विद्यते। कुमारसम्भवेऽपि कविनाऽमुना अद्वितीयोपमारचनाया स्वकाव्यचातुरी प्रकटिताऽस्ति-

"मार्गाचलव्यतिकराकुलितेव ______ न ययौ न तस्थौ" अर्थात् पर्वत पुत्री पार्वती शिवस्वरुपं विज्ञाय, शिवं प्रति गन्तुमनाऽपि तथैव न गता नावस्थिता, यथा मार्गस्थ पर्वतव्यवधानेन काचिद् नदी नैवाग्रे गच्छति नैव तिष्ठत्येव।

नन्दिनीसेवा- संसक्तेन राजर्षिणा दिलीपेन पुरस्कृता सुदक्षिणया प्रत्युद्गता नन्दिनी, दिवस- निशा- माध्यस्थ्यम् अवलम्बमाना साक्षात्सन्ध्येव शोभते।

अभिज्ञानशाकुन्तलन्तु क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीतायाः इति दिशानुसारं सर्वश्रेष्ठमेव नाटकं वर्तते। एतन्नायिकायाः शकुन्तलायाः अनघं रूपम् उपमान - परम्परया प्रोद्भासितं भासते, यथा- "अनाघ्रातं पुष्पं ____ कमिह समुपस्थास्यति विधिः।।"

रघुवंशे यदा इन्दुमती स्वयंवरे जयमालां वहन्ती पंक्तिबद्धान् भूपान् विहाय पुरस्सरति तदानीं ते पश्चान्मुक्ता राजानः म्लानिमुपगता तथैव न राजन्ते स्म यथा कयाचित् संचारिष्या दीपशिखया राजमार्गस्यहर्म्याणि यदा त्यज्यन्ते तत्तथा न शोभन्ते। सैषा उपमात्र प्रस्तूयते- "संचारिणी दीपशिखेव रात्रौ ______ प्रलीनभावं स भूमिपालः।" अस्याः उपमाया एव कारणात् कवेरस्य नाम दीपशिखा कालिदासः इति संजातम्।

एतादृशीनां स्वभावरमणीयानां प्राकृतिकानां लौकिकानामेव पदार्थानाम्, अपि तु स्वीयशास्त्रीयज्ञानं व्यञ्जयता रसास्वादं निर्बाधं ददता तेन शास्त्रीयोपमानामपि अतीव मञ्जुला सृष्टिः कृता। इत्थं कालिदासस्य कृतिषु सहस्रशः सन्ति उपमाप्रयोग स्थलानि। इत्थं महाकविः कालिदासः स्वकीयोपमासम्पत्तिभिः कस्य सचेतसः चेतः न आवर्जयति। तस्य काव्यसौन्दर्यं प्रेक्ष-प्रेक्ष्य सहृदयाः सुधियः तस्य कला कौशलम् प्रशंसन्त्येव। तस्य सूक्तयः सुधासिक्ता मञ्जर्यः इव चेतोहराः सन्ति। युक्ता एव इवं जनश्रुतिर्यद् 'उपमा कालिदासस्य।'

आषाढस्य प्रथमदिनं महाकविः कालिदासदिनं जनाः मन्यन्ते। कविकुलगुरवे कालिदासाय नमः।

**डॉ. वर्षा प्रकाश टोणगांवकर पुणे, महाराष्ट्रम्**

# लौकिकन्यायकोशः

## कुलकन्यकान्यायः


रूपवती गुणवती शीलवती च काऽपि कन्या भवति चेत् यथार्थतः तस्य कारणं तस्याः मातृगृहमेव। श्वशुरगृहे व्यर्थमेव यशो गच्छति। प्रत्युत तया कन्यकया अपि भूरि कार्यं करणीयं भवति। एवं कुतश्चित् प्राप्तानां गुणानां यशः कुत्रचित् गतं भवति चेत् अयं न्यायः प्रवर्तते।

**"सत्यं सन्ति गृहे गृहे सुकवयो येषां वचश्चातुरी।**
**स्वे हर्म्ये कुलकन्यकेन लभते जातैर्गुणैर्गौरवम्।।"**


**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे, महाराष्ट्रम्**

# हास्यकणिका

**पत्नी-** मातः! पतिः कः उच्यते?
**श्वश्रूः-** यः मस्तिष्कस्य वाद्यं वादयित्वा, मस्तिष्कं दधिवत् कृत्वापि च मस्तिष्के एव तिष्ठति, सः पतिः उच्यते। 🤣 😅
पतिः 😳 😠
**पतिः-** अहं वदामि, पत्नी का उच्यते इति?
**श्वश्रूः पत्नी च-** (एकस्वरे) न, न! अस्माभिः तत् ज्ञातुमेव न इच्छ्यते। 😄
पतिः 😠 😡




**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। अद्य मया काचित् विचित्रा वार्ता पठिता। अन्तर्जाले धनिकैः स्वकीयाः दुष्टवार्ताः मार्जयितुम् एकः "कृत्रिममेधा- न्यायालयः" निर्मितः। यन्त्रेण एव आपत्तयः प्रदर्शिताः।
**नन्दिनी-** अहो! धनिकैः यन्त्रस्य दुरुपयोगः कृतः! सा वार्ता अतीव विचित्रा। किन्तु मया अपरा क्रीडावार्ता श्रुता। आङ्ग्लदेशे एका क्रिकेटक्रीडा आयोजिता। तदा कश्चन महावृषभः तत्र आगतः। तेन महावृषभेण क्रीडा बाधिता। कृषकेण तं नेतुम् एका गौः अपि आनीता। तथापि सः न निर्गतः। अन्ते अधिकारिभिः क्रीडा एव स्थगिता।
**काव्या-** हा हा! वृषभात् क्रीडालवः भीताः! महदद्भुतम्। किन्तु पशुभिः साहाय्यम् अपि कृतम्। कोलोराडो-प्रदेशे दावाग्निः जातः। तत्र एका अजा दृष्टा। तया अजया अग्निशामकानां साहाय्यं कृतम्। तया कठिनपर्वते सुरक्षित-मार्गः दर्शितः।
**नन्दिनी-** अहो! अजायाः बुद्धिमत्ता अपूर्वा! अग्निशामकैः तस्याः साहाय्यं प्राप्तम् इति शोभनम्। किन्तु सर्वदा पशवः न शान्ताः। अमेरिका-देशे एकस्मिन् उद्याने केनचित् क्रुद्ध-महामहिषेण एकः पितामहः आक्रान्तः। सः पितामहः अष्ट-पाद- परिमितम् आकाशे क्षिप्तः। तथापि सः जीवितः!
**काव्या-** आश्चर्यम्! महिषेण तावान् आघातः कृतः, तथापि सः हसितवान् अस्ति। अद्यतनाः सर्वाः वार्ताः अतीव विचित्राः।




# संस्कृतं मधुरं सदा- ५७

साधनाक्षेत्रे प्रथमतः मनसः नियन्त्रणविषयः आयाति। कारणं मनो हि प्रकृतिपुरुषयोः मध्यगतं प्रमुखम् इन्द्रियम्। एतत् अत्यन्तं भ्रमणशीलं चपलञ्च उपकरणम्। भ्रममाणेन स्थाणुविषयं नावगच्छति, तस्मादेतस्य संयमनम् अनिवार्यं भवति साधनाक्षेत्रे। मनुष्यस्य बन्धनं मोक्षः चेति अनयोः मुख्यकारणं हि मनः- 'मन एव मनुष्याणां कारणं बन्धमोक्षयोः' इति। मनुष्यस्य लक्ष्यं न सांसारिकी लिप्तता, अपितु अस्मात् निर्लिप्तता हि द्वितीयतत्त्वस्य अर्थात् ब्रह्मप्राप्तेः कारणं भवति। अस्मिन् विषये किञ्चिदत्र चर्च्यते। योगिभिः मनसः साक्षात्कारं कुर्वद्भिः स्वानुभवे कथ्यते यत्, अस्यानुभवं प्रत्येकं योगिनः कर्तुं प्रभवेयुरिति। मनसो नैजस्वरूपं प्रकाशबिन्दूनां समाहारवदस्ति। यथा भ्राजमानः प्रकाशबिन्दुः असकृत् प्रकटीभूय पुनः तिरोहितो भवति। अयं क्रमः खद्योतप्रकाशः इव वारम्वारं प्रवर्तते। सात्त्विककर्मणः सम्पादनसमये इदं मनः शान्तं, चन्द्रबिम्बवत् सौम्यवर्णीयं भवति। भयङ्कर- क्रूर-घोरादिकर्मणः च सम्पादनसमये भयावहाः, धूम्रमिश्रित-रक्तवर्णीयाः च किरणाः मनसो निस्सरन्ति। एवं भयं, तामसिकप्रभावं सम्प्राप्य इदं मनः सङ्कुचितं, मलिनं, तेजोविहीनं, निस्साराभायुतं च स्वरूपं प्रदर्शयति। तेषां किरणानां साक्षात्कारः तत्तदङ्गद्वारा सम्भवति, यत् मनसः एतादृशेन कर्मणा प्रभावितं स्यात्। इतोऽपि स्पष्टतार्थं, सात्त्विकं मनः शुभ्रेण चन्द्रबिम्बेन समानम्, सौम्यप्रभायुतं, शान्तं, स्थिरं, विषयेभ्यो विरागयुक्तं तथा गम्भीरं भवति। राजसिकं मनः शुक्रनक्षत्रवत् भ्राजमानं, नीलाभायुक्तं, चपलं, तीव्रगतियुक्तम्, इन्द्रियाणां कर्मार्थं प्रेरकं, ज्ञानसम्पादनार्थम् उद्योगरतं, विद्युद्वत् क्षिप्रं, शक्तिमत्, ज्ञान-विज्ञानयोः ग्रहणसमये अतीव सावधानं च भवति। एवमेव तामसिकं मनः कृष्णधूम्रवत्, दीर्घसूत्रि, देहस्य निष्क्रियकं, सारहीनं, मूर्च्छित-भावनायुक्तं, ज्ञानकर्मादिषु प्रवृत्तिरहितम्, अकर्मण्यञ्च भवतीति एवं मनसो विविधं स्वरूपं कथ्यते इति, शुभम्।

### ऐतिहासिक्यः उपलब्धयः, बी.बी.एम.बी. (BBMB) अवशिष्टराशये प्रचेष्टा

मुख्यमन्त्रिणा कथितं यत् वर्तमानसर्वकारेण सर्वदा हिमाचलप्रदेशस्य हितान् सर्वोपरि स्थापिताः राज्यस्य अधिकाराणां संरक्षणाय च कठोरपदानि उत्थापितानि। तेन किशाऊ-बहुउद्देश्यीयपरियोजनायाम् अस्मिन् सहमतौ एकाम् ऐतिहासिक्यम् उपलब्धिं कथयता प्रोक्तं यत् अस्याः रणनीतिक-विजयतः अस्यां महत्त्वपूर्णायां परियोजनायां हिमाचलप्रदेशस्य वैधानिकः भागः दीर्घकालिकाः लाभाश्च सुनिश्चिताः अभवन्। तेन प्रतिपादितं यत् राज्यसर्वकारः भाखड़ा-ब्यास-प्रबन्धन-बोर्ड (BBMB) इत्यस्य परियोजनाभ्यः हिमाचलप्रदेशाय प्राप्यमाणायाः १३,०६६ मिलियन-यूनिट् विद्युतः लम्बित-अवशिष्टराशिं (एरियर) प्राप्तुम् अपि प्रचेष्टाः तीव्रीकरोति।

# हजारीबागनगरे सन्तकोलम्बा- कृष्णवल्लभ- महिलामहाविद्यालययोः संस्कृतनामांकनं पुनः प्रारब्धम्





**हिमसंस्कृतवार्ताः- डॉ. सुबोधकुमारसाहूः, हजारीबाग।** हजारीबागनगरे स्थिते विनोबाभावेविश्वविद्यालयस्य अङ्गभूते सन्तकोलम्बामहाविद्यालये, कृष्णवल्लभ-महिलामहाविद्यालये च राज्यशासनस्य पूर्वनिर्देशानुसारं संस्कृतप्रवेशनं स्थगितमासीत्। तेन छात्राः चिन्तिताः अभवन्, विश्वविद्यालये च मुहुर्मुहुः ज्ञापनपत्रं समर्पयन्ति स्म। तदनन्तरं राज्यशासनं संशोधितम् आदेशम् अयच्छत् यस्य परिणामतः विश्वविद्यालयः उभयोः महाविद्यालययोः प्रवेशनार्थम् अन्तर्जालपटलम् उदघाटयत्। एतेन छात्रेषु महान् हर्षः अजायत। प्रवेशनप्रारम्भस्य सन्तोषेण उभयोः महाविद्यालययोः छात्राः विश्वविद्यालयस्य कुलपतिना प्रो. चन्द्रभूषणशर्मणा सह अमिलन् तस्मै विशेषधन्यवादम् अज्ञापयन् पुष्पगुच्छं च असमर्पयन्। छात्राः अवदन् यत् प्रवेशनप्रारम्भे भवतः महती भूमिका अस्ति। तदा कुलपतिः अवदत् यत् अस्माकम् उद्देश्यं सर्वदा उन्नतं भवेत् तथा च विश्वविद्यालयः सर्वदा संस्कृतछात्रैः सहास्ति। तदनन्तरं विद्यार्थिनः कुलसचिवेन सह अमिलन् तस्मै धन्यवादं न्यवेदयन् पुष्पगुच्छं च असमर्पयन्। ततः प्रवेशनकोषाङ्गस्य नोडलपदाधिकारिणा डॉ. इन्द्रजितकुमारेण सह मिलित्वा ते धन्यवादं न्यवेदयन् पुष्पगुच्छं च असमर्पयन्। सः अवदत् यत् संस्कृतप्रवेशनस्य स्थगनानन्तरं सर्वे छात्राः शिक्षकाश्च चिन्तिताः आसन् तथा च विश्वविद्यालयप्रशासनाय ज्ञापनपत्रं ददति स्म। तदा कुलपतिः गाम्भीर्यं प्रदर्श्य उच्चशिक्षाविभागस्य अधिकारिभिः सह संवादम् अकरोत्। सः विंशत्यधिकद्विसहस्रतमकृष्टाब्दस्य नूतनशिक्षानीतेः अन्तर्गतं भारतीयभाषाणां संरक्षणस्य आवश्यकताविषये अधिकारिणः अबोधयत् संस्कृतस्य योगदानविषये च विमर्शम् अकरोत्। तस्य फलस्वरूपम् उच्चशिक्षाविभागः पुनर्विचारं कृत्वा संस्कृते प्रवेशनं निरन्तरं कर्तुम् आदेशम् अयच्छत्। उभयोः महाविद्यालययोः छात्राः स्वप्राचार्यैः सह अमिलन् धन्यवादं च अज्ञापयन्। ततश्च स्नातकोत्तरसंस्कृतविभागं गत्वा विद्यार्थिनः वर्तमानविभागाध्यक्षया डॉ. अञ्जुमारया, पूर्वाध्यक्षेण डॉ. नकुलपाण्डेयेन च सह मिलित्वा धन्यवादम् अज्ञापयन् पुष्पगुच्छप्रदानेन आभारं च अदर्शयन्। विद्यार्थिनः अवदन् यत् अस्मिन् सम्पूर्णे प्रकरणे डॉ. नकुलपाण्डेयमहोदयस्य प्रयासः वन्दनीयः अस्ति। डॉ. पाण्डेयः अवदत् यत् प्रवेशनस्थगनानन्तरं सः कुलपतिमारभ्य प्रधानमन्त्रिणं यावत् सर्वान् एतस्मिन् गम्भीरविषये अवगतम् अकारयत्। अन्ते निर्णयानन्तरं विश्वविद्यालयः उभयोः महाविद्यालययोः विद्यार्थिभ्यः षष्टि-षष्टिसङ्ख्याकानि आसनानि, प्राध्यापकेभ्यः द्वे पदे अन्वमन्यत। अन्ततः सन्तकोलम्बामहाविद्यालयस्य संस्कृतविभागाध्यक्षः डॉ. सुबोधकुमारसाहूःअवदत् यत् इदानीं महाविद्यालये संस्कृते अधिकाधिकं प्रवेशनं कथं भवेत् तदर्थम् अस्माभिः प्रयासः करणीयः यतः अन्तर्जालमाध्यमेन आवेदनस्य समयः सप्तममासस्य सप्तदशदिनाङ्कं यावत् एव अस्ति।

# HPBOSE: छात्रेभ्यः महती आश्वासनम्,

## एसओएस परीक्षायाः कृते विलम्बशुल्केन सह अस्मात् दिनाङ्कात् पूर्वं पूरयितुं शक्नुवन्ति आवेदनपत्राणि



**हिमसंस्कृतवार्ताः- धर्मशाला।** हिमाचल प्रदेश राज्य मुक्त विद्यालयस्य अन्तर्गतं अष्टम- दशम- द्वादशकक्षाणां परीक्षां दातुम् इच्छुकैः छात्रेभ्यः शिक्षामण्डलेन महती आश्वासनम् दत्ता अस्ति। मण्डलेन सितम्बर २०२६ मासे प्रचल्यमानानां परीक्षाणां कृते अनलाईन-पञ्जीकरणस्य, प्रवेशपत्रस्य समर्पणस्य च अन्तिमा तिथिः जुलाई २० पर्यन्तं वर्धिता। शिक्षा मण्डलस्य अध्यक्षः डा. राजेशशर्मा अवदत् यत् संशोधित- कार्यक्रमानुसारं विभिन्नानां श्रेणीनां कृते भिन्न-भिन्नं विलम्बशुल्कं निश्चितम् अस्ति।

### विलम्बशुल्कस्य विवरणम्

₹२,००० विलम्बशुल्कम्: प्रत्यक्ष-प्रवेशः, विना टीओसी, प्रत्यक्ष-विज्ञानम्, टीओसी-सहितं पुनः प्रवेशः, अतिरिक्तविषयाः, विशेष-अङ्क-सुधार-परीक्षायाः च अभ्यर्थिनः २००० रूप्यकाणां विलम्बशुल्केन सह २० जुलाई पर्यन्तं आवेदनं कर्तुं शक्नुवन्ति।

**₹१,००० विलम्बशुल्कम्-** पुनः परीक्षा, एकवर्षस्य अन्तः परिणाम-सुधारार्थं च अभ्यर्थिभ्यः १००० रूप्यकाणां विलम्बशुल्कं ग्रहीष्यते। एतेषाम् अपि आवेदनपत्र-पूरणस्य अन्तिमतिथिः २० जुलाई एव अस्ति।

# हिमकेयर' योजनां कलङ्कितं कर्तुं मुख्यमन्त्री असत्यं वदति-जयरामठाकुरः



हिमसंस्कृतवार्ताः- शिमला। पूर्वमुख्यमन्त्री, विपक्षनेता च जयरामठाकुरः मुख्यमन्त्रिणं सुखविन्द्रसिंहसुक्खुमहोदयं प्रति आरोपं अकरोत् यत् सः 'हिमकेयर' योजनायाः विषये सततं जनतां भ्रमयति। सर्वकारस्य एव आधिकारिकाः प्रलेखाः तस्य दावानां पोलं (सत्यतां) प्रकटयन्ति। ठाकुरः अवदत् यत् सूचनाधिकारनियमेन याचितायां जानकारियां सर्वकारेण स्वयं स्वीकृतं यत् २०१९ तः २०२२ वर्षपर्यन्तं प्रदेशस्य सर्वकारीय-चिकित्सालयेषु कृतेषु 'हिस्टरेक्टॉमी' (गर्भाशयोत्पाटन-अस्त्रोपचारप्रकणेषु पुरुषरोगिभिः सम्बद्धं एकमपि प्रकरणं सर्वकारीयलेखेषु पञ्जीकृतं नास्ति।

सः अवदत् यत् यदा आधिकारिकलेखेषु तादृशं किमपि प्रकरणं विद्यमानं नास्ति, तदा मुख्यमन्त्रिणा क्रियमाणाः आरोपाः तथ्यहीनाः सिद्ध्यन्ति। विपक्षनेता आरोपम् अकरोत् यत् भाजपा- सर्वकारस्य कार्यकाले आरब्धा 'हिमकेयर' योजना प्रदेशस्य लक्षाधिकपरिवाराणां कृते साहाय्यस्य माध्यमम् अभवत्, अस्याः लोकप्रियता च अद्यापि तथैव वर्तते। मुख्यमन्त्री अस्याः योजनायाः सफलतया असहजः अस्ति, अत एव एनां विवादेषु कर्षित्वा कलङ्कितं कर्तुं प्रयतते। जयरामठाकुरः अवदत् यत् वर्तमानसर्वकारः स्वस्य सार्धत्रिवर्षीये कार्यकाले जनतायाः कृते तादृशीं कापि बृहतीं जनकल्याणकारिणीं योजनाम् आरब्धुं न शक्नोत्, यस्याः तुलना 'हिमकेयर' सदृशीभिः योजनाभिः सह कर्तुं शक्येत।

# देहल्यां सोनमवाङ्चुकमहोदयस्य अनशनं सप्तदशमे दिने प्रविष्टम्, स्वास्थ्यं प्रभावितम्



देहल्याः जन्तर-मन्तर-स्थले देशस्य शिक्षाव्यवस्थायां सुधाराय तथा च प्रतियोगात्मकपरीक्षासु कथित-उत्कोचप्रथायाः (धांधली) विरुद्धं प्रचलिते आन्दोलने उपविष्टस्य प्रख्यात-शिक्षाविदः सोनमवाङ्चुकस्य अनिश्चितकालीन-क्षुधाहड़तालः (अनशनम्) मङ्गलवासरे सप्तदशमे (17) दिने प्राविशत्। जून-मासस्य अष्टाविंशतितमात् (28) दिनाङ्कात् सततम् अनशने उपविष्टस्य वाङ्चुकस्य शारीरिकी स्थितिः अतीव चिन्ताजनकी (नाजुका) अभवत्। चिकित्सकीय-प्रतिवेदनस्य (रिपोर्ट) अनुसारं, गतेषु सप्तदशसु दिनेषु सोनमस्य भारः (वजन) प्रायः सार्धाष्ट (8.5) किलोग्राममितं न्यूनः जातः। सततम् अपक्षीयमानं स्वास्थ्यं दृष्ट्वा देशस्य अनेकैः दिग्गज-राजनैतिकनेतृभिः, सामाजिककार्यकर्तृभिः, चलच्चित्रजगतः प्रसिद्धव्यक्तिभिः च तं प्रति अनशनसमापनाय भावपूर्णा प्रार्थना कृता।

सपा-प्रमुखः अखिलेशयादवः, शिवसेनाध्यक्षः उद्धवठाकरे, टीएमसी-सांसद् महुआमोइत्रा, नसीरुद्दीनशाहः, रत्नापाठकशाहः, लेखिका अरुन्धतीरॉय इत्यादयः बहवः प्रमुखाः महानुभावाः सोनमं प्रति अनशनत्यागाय अनुरुद्धवन्तः। कॉकरोचजनतापार्टी (सीजेपी) इति दलेन कथितं यत् सर्वकारः वाङ्चुकस्य विषये किमपि चिन्तनं न करोति। वाङ्चुकस्य जीवनं सङ्कटापन्नम् अस्ति। सर्वकारेण तस्य अभियाचनासु ध्यानं दातव्यम्।

# पश्चिमबङ्गालसर्वकारेण ओबीसि-सूची-सम्बद्धा याचिका सर्वोच्चन्यायालयात् प्रत्याहृता

पश्चिमबङ्गालसर्वकारेण राज्यस्य अन्यपिछड़ावर्ग-ओबीसि (OBC) सूच्यां सप्तसप्ततिः (77) समुदायान्, येषु अधिकांशतः मुस्लिमसमुदायाः सन्ति, समाविशति कलकत्ता-उच्चन्यायालयस्य निर्णयं निरस्यतः विरुद्धं दापिता स्वकीया याचिका सर्वोच्चन्यायालयात् (सुप्रिम कोर्ट) प्रत्याहृता (